# BISHOP SCOTT BOYS' SCHOOL

**(Affiliated to CBSE, New Delhi) Affiliation No.: 330726, School Campus: Chainpur, Jaganpura, By-Pass, Patna 804453.**
**Phone Number: 7061717782, 9798903550. ,**
**Web: www.bishopscottboysschool.com Email: info@bishopscottboysschool.com**

Sarvada Sarva shreshth
HOLISTIC DEVELOPMENT


## SANSKRIT
**SESSION-2020-21**
**CLASS-VIII**

## TOPIC: पाठ –5 विश्वस्य कीडाक्षेत्रे भारतस्य द्वे तारिके / सन्धिः

पाठ्य–पुस्तक–सरस्वती संस्कृत–कल्पः

## DAY-1

### तेजस्विनी सावन्त–

भुशुण्डिचालने विश्वविख्याता तेजस्विनी 1980 तमे वर्षे सितम्बरमासस्य द्वादशतारिकायां कोल्हापुरे महाराष्ट्रे अजायत्। अस्याः जनकः श्रीरविन्द्रसावंतः जलसेनायाम् अधिकारी आसीत् । तस्याः माता सुनीता आसीत्। बाल्यकालादेव अस्याः रुचिः भुशुण्डिचालने आसीत्। निरन्तरम् अभ्यासेन सा 2004 तमे वर्षे पाकिस्तानस्य इस्लामाबादनगरे " दक्षिणएशियास्पोर्ट्सफेडरेशनेन " आयोजिता 50 मीटर भुशुण्डिचालन–प्रतियोगितायां भारतस्य प्रतिनिधित्वम् अकरोत् स्वर्णपदकं च अलभत्।

अर्थ– बंदूक चलाने में विश्वप्रसिद्ध तेजस्विनी 1980 ई0 में सितंबर महीने के 12 तारीख को कोल्हापुर ( महाराष्ट्र) में जन्म ली । इनके पिता श्री रविन्द्र सावंत जलसेना में अधिकारी थे। उनकी माँ सुनीता थी। बचपन से ही इसकी रुचि बंदूक चलाने में थी। लगातार अभ्यास से वह 2004 ई0 में पाकिस्तान के इस्लामाबाद में " दक्षिण एशिया स्पोर्ट्स फेडरेशन के द्वारा " आयोजित 50 मीटर बंदूक चालन प्रतियोगिता में भारत का प्रतिनिधित्व की और स्वर्णपदक पाई ।

2006 तमे वर्षे राष्ट्रमंडलकीडायाम् एशियनकीडासु च सा 10 मीटर भुशुण्डिचालने अनेकानि पदकानि लब्धवती। तदनन्तरं जर्मनीदेशे म्यूनिखनगरे आयोजितायां विश्वकपप्रतियोगितायां 2009 तमे वर्षे सा 50 मीटर भुशुण्डिचालने कांस्यपदकम् अविन्दत्। 2010 तमे वर्षे पुनः म्यूनिखनगरे आयोजितायां विश्वप्रतियोगितायां विजयी भूत्वा सा स्वर्णपदकं प्राप्य " विश्वविजेता " रुपेण विख्याता अभवत्। अस्मिन्नेव वर्षे राष्ट्रमंडलकीडायाम् सा एकलप्रतियोगितायां रजतपदकं सकलप्रतियोगितायां च कांस्यपदकम् अलभत्। भुशुण्डिचालने अस्याः योगदानाय 2011 तमे वर्षे भारतसर्वकारः तस्यै " अर्जुनपुरस्कारम् "अयच्छत्।

अर्थ– 2006 ई0 में राष्ट्रमंडल खेल और एशियन खेल में वह 10 मीटर बंदूकचालन में अनेक पदक पाई। उसके बाद जर्मनी के म्यूनिख नगर में आयोजित विश्वकपप्रतियोगिता में 2009 ई0 वह 50 मीटर बंदूकचालन में कांस्यपदक प्राप्त की। 2010 ई0 में फिर म्यूनिख नगर में आयोजित विश्वप्रतियोगिता में विजयी होकर वह स्वर्णपदक प्राप्त कर ( विश्वविजेता ) के रुप में विश्वप्रसिद्ध हुई। इसी वर्ष राष्ट्रमंडल खेल में वह एकलप्रतियोगिता में रजतपदक और सामूहिकप्रतियोगिता में कांस्यपदक पाई । बंदूकचालन में इसके योगदान के लिए 2011 ई0 में भारत सरकार उसको ( अर्जुनपुरस्कार) दिया ।

### मिथाली राज–

विश्वप्रसिद्धा क्रिकेटखेलिका मिथाली राज 1982 तमे वर्षे जोधपुरनगरे राजस्थाने पित्रोः लीलाराज–दुरईराजयोः गेहे अजायत् ।

अर्थ— विश्वप्रसिद्ध क्रिकेटखिलाड़ी मिथाली राज 1982 ई0 में जोधपुरनगर राजस्थान में लीलाराज और दुरईराज के घर में जन्म ली ।

अस्याः जनकः वायुसेनायाम् अधिकारी आसीत्। शैशवादेव सा क्रिकेटं खेलितुम् आरभत्। यदा सा सप्तदशवर्षीया आसीत् तदा तस्याः भारतीयमहिलाक्रिकेटदले चयनम् अभवत्। सा एकदिवसीयक्रिकेटे टेस्टक्रिकेटे च बहवः कीर्तिमानाः अस्थापयत्।1999 तमे वर्षे एकदिवसीयक्रिकेटे आयरलैण्डस्य सम्मुखे प्रथमं वारं क्रीडन् सा 114 धावनानि अलभत्।

अर्थ— इनके पिता वायुसेना में अधिकारी थे। बचपन से ही वह क्रिकेट खेलना आरंभ की। जब वह 17 वर्ष की थी तब उसका भारतीय महिला क्रिकेट में चयन हुआ। वह एकदिवसीय क्रिकेट और टेस्ट क्रिकेट में बहुत कीर्तिमान् स्थापित की। 1999 ई0 में एकदिवसीय क्रिकेट में आयरलैण्ड के साथ पहली बार खेलते हुए 114 रन बनाई ।

2002 तमे वर्षे नवदशवर्षीया सा इंग्लैण्डस्य सम्मुखे 214 धावनानि अर्जयित्वा नवकीर्तिमानम् अरचयत् । तया क्रिकेटस्य " विंशति—विंशति" क्रीडायाम् अपि अनेकानि अर्धशतकानि अर्जितानि।

अर्थ— 2002 ई0 में 19 वर्ष में वह इंग्लैण्ड के सामने 214 रन बनाकर नया कीर्तिमान् बनाई। उसके द्वारा क्रिकेट के 20—20 खेल में भी अनेक अर्धशतक बनाई।

2006 तमे वर्षे इंग्लैण्डे तस्याः नेतृत्वे भारतीयमहिला क्रिकेटदलः टेस्टश्रेण्यां प्रथमं वारं विजयी अभवत् । अस्मिन्नेव वर्षे तया एशियाकपम् अपि लब्धम्। अद्यत्वे अखिलविश्वे क्रिकेटखेलिकासु तस्याः स्थानं प्रथमं वर्तते । सा श्रेष्ठा कन्दुकक्षेपिका अपि अस्ति। 2013 तमे वर्षे महिला—क्रिकेट—विश्वकप—प्रतियोगितायां तस्याः नेतृत्वे भारतवर्षः प्रथमं स्थानम् अविन्दत्। तस्याः क्रिकेटक्षेत्रे अद्वितीयं योगदानं दृष्ट्वा सा भारतसर्वकारेण 2003 तमे वर्षे ' अर्जुनपुरस्कारेण ' तथा च 2015 तमे वर्षे ' पद्मश्री ' सम्मानेन अलंकृता अभवत्।

अर्थ— 2006 ई0 में इंग्लैण्ड में उनके नेतृत्व में भारतीयमहिला क्रिकेट टेस्ट श्रेणी में पहली बार विजयी बनी । इसी वर्ष उसके द्वारा एशिया कप भी पाई गई। आज पूरे विश्व में क्रिकेटखेल में उसका पहला स्थान है। वह श्रेष्ठ गेंदबाज भी है। 2013 ई0 में महिला क्रिकेट विश्वकप प्रतियोगिता में उसके नेतृत्व में भारतवर्ष पहला स्थान पाई। उसका क्रिकेट के क्षेत्र में अद्वितीय योगदान देखकर वह भारत सरकार के द्वारा 2003 ई0 में ' अर्जुन पुरस्कार ' से तथा 2015 ई0 में ' पद्मश्री ' सम्मान से सुशोभित हुई ।

शब्दार्था :—

भुशुण्डी — बंदूक
तारिकायां — तारीख में
अजायत् — पैदा हुई
एकलप्रतियोगितायां — व्यक्तिगत प्रतियोगिता में
सकलप्रतियोगितायां — दलगत प्रतियोगिता में
कीर्तिमानाः — रिकॉर्ड
पित्रोः — माता—पिता के
गेहे — घर में
लब्धवती — प्राप्त किया
धावनानि — रन
नवकीर्तिमानम् —नया रिकॉर्ड
कन्दुकक्षेपिका — गेंदबाज
नेतृत्वे — कप्तानी में

## धातुएँ —

जा – उत्पन्न होना , रच् – बनाना , अर्ज् – अर्जित करना , वृत् – होना ,

अव्यय – निरन्तरम्– लगातार, तदनन्तरम् – उसके बाद , कुतः– कहाँ से , अति – अधिक , भूयः भूयः – बार – बार , इति – ऐसा
तथापि– तो भी, सम्यक् – उचित, सर्वदा–हमेशा, तदैव –तभी

# DAY-2

## प्रत्ययांत शब्द–

लब्धवती – लभ्+क्तवतु+ङीप्
लब्धम्– लभ्+क्त
खेलितुम्– खेल्+तुमुन्
प्राप्य–प्र+आप्+ल्यप्
अर्जयित्वा– अर्ज्+क्त्वा
क्रीडन् –क्रीड्+ शतृ

## संधियुक्त शब्द–

कालादेव – कालात् + एव ,

शैशवादेव – शैशवात् + एव

अस्मिन्नेव – अस्मिन् + एव

तदनन्तरम्– तत् + अनन्तरम्

## समस्तपद–

भुशुण्डिचालने – भुशुण्ड्याः चालने
विश्वविख्याता – विश्वे विख्याता
विश्वप्रसिद्धा – विश्वे प्रसिद्धा
क्रिकेटखेलिका– क्रिकेटस्य खेलिका
पित्रोः – माता च पिता च, तयोः समाहारः
क्रिकेटदले– क्रिकेटस्य दले

## मौखिक कार्यम्–

1. ( क ) तेजस्विनी कुत्र अजायत् ? उ0 – कोल्हापुरे ( महाराष्ट्रे )।
( ख ) तेजस्विनी कस्मिन् क्रीडायां निपुणा अस्ति ? उ0 – भुशुण्डिचालने ।
( ग ) तया 2010 तमे वर्षे किं पदकं प्राप्तम् ? उ0 – स्वर्णपदकं ।
( घ ) मिथाली कदा 114 धावनानि अर्जितवती ? उ0 – 1999 तमे वर्षे ।
( ङ ) 2015 तमे वर्षे सा कः सम्मानः अलभत् ? उ0 – पद्मश्री ।
( च ) एकदिवसीयक्रिकेटे सा कस्य सम्मुखे प्रथमं वारम् अक्रीडत् ? उ0 – आयरलैण्डस्य ।

## लिखत–

1. अनुच्छेदं पठित्वा प्रश्नान् उत्तरत् ।

अस्याः जनकः वायुसेनायाम् अधिकारी आसीत्। शैशवादेव सा क्रिकेटं खेलितुम् आरभत्। यदा सा सप्तदशवर्षीया आसीत् तदा तस्याः भारतीयमहिलाक्रिकेटदले चयनम् अभवत्। सा एकदिवसीयक्रिकेटे

टेस्टक्रिकेटे च बहवः कीर्तिमानाः अस्थापयत्।1999 तमे वर्षे एकदिवसीयक्रिकेटे आयरलैण्डस्य सम्मुखे प्रथमं वारं क्रीडन् सा 114 धावनानि अलभत्।

**I.** एकपदेन उत्तरत् –

( क ) मिथालीराजस्य भारतीयमहिलाक्रिकेटदले चयनम् कदा अभवत्? उ0–1999 तमे वर्षे।

( ख ) शैशवादेव सा किं खेलितुम् आरभत्। उ0– क्रिकेटं ।

**II.** पूर्णवाक्येन उत्तरत –

सा कस्मिन् बहवः कीर्तिमानाः अस्थापयत् ?

उत्तर– सा एकदिवसीयक्रिकेटे टेस्टक्रिकेटे च बहवः कीर्तिमानाः अस्थापयत् ।

**III.** निर्देशानुसारेण प्रश्नान् उत्तरत ।

( क ) ' विमुखे ' ' कतिपयाः ' पदयोः विपरीतार्थकशब्दौ गद्यांशात् चिनुत।

उत्तर– विमुखे– सम्मुखे , कतिपयाः– बहवः ।

( ख ) ' खेलितुम् ' ' क्रीडन् ' प्रकृतिप्रत्ययविभागं कुरुत।

उत्तर– खेलितुम्– खेल् + तुमुन् , क्रीडन् – क्रीड्+ शतृ

# DAY- 3

2. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

( क ) तेजस्विनी भारतस्य प्रतिनिधित्वम् अकरोत । उ0– कस्य ?

( ख ) ते अर्जुनपुरस्कारं प्राप्नुतः । उ0– के ?

( ग ) सा स्वर्णपदकं प्राप्य प्रसन्ना अभवत् । उ0– किम् ?

( घ ) सा जोधपुरनगरे अजायत् । उ0 – कुत्र ?

( ङ ) सा श्रेष्ठा कन्दुकक्षेपिका अस्ति । उ0 – का ?

## भाषिककार्यम्–

1. लकारं परिवर्तयत ।

. ( क ) सा क्रिकेटम् अखेलत्। ( लृट् लकार ) उ0– खेलिष्यति ।

( ख ) ते प्रसिद्धे स्तः । ( लङ् लकार ) उ0– आस्ताम् ।

( ग ) अहं प्रतिदिनं क्षेत्रे क्रीडामि । ( लोट् लकार ) उ0– क्रीडानि ।

( घ ) सः मल्लयुद्धाय गमिष्यति । ( लट् लकार ) उ0– गच्छति ।

( ङ ) त्वं विजयी अभवः । ( विधिलिङ् लकार ) उ0– भवेः ।

2. कोष्ठकात् उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत ।

( क )————————उभयतः वृक्षाः सन्ति ।( क्रीडाक्षेत्रे, क्रीडाक्षेत्रम्, क्रीडाक्षेत्रस्य)

( ख ) गुरुः ——————— प्रश्नं पृच्छति । ( शिष्याय, शिष्यम्, शिष्यान् )

( ग ) पल्लवी ———————— सह क्रीडति । ( प्रणवेन, प्रणवं, प्रणवस्य )

( घ ) बालकः——————————प्रति गच्छति । ( विद्यालयस्य, विद्यालयाय, विद्यालयम् )

( ङ ) सः ————————— पदकं दास्यति ? ( कम् , कस्मै, केन )

( च )—————————— दुग्धं न रोचते ? ( महयम् , मम , माम् )

उत्तर– गृहकार्य करें ।

3.असंगतं पदं चिनुत् ।

( क ) चिकित्सकः, क्रीडकः, भल्लुकः, रक्षकः, पुत्रवाहकः।——————————

( ख ) रामेण , तेन, केन, सीतायाः, लतया।——————————

( ग ) श्रुत्वा, पठितुम्, गत्वा, दृष्ट्वा, नत्वा । ——————————

( घ ) शशकः, कुक्कुरः, श्येनः, सिंहः, बिडालः ।——————————

( ङ ) अहसताम्, खादिष्यति, वर्षायाम्, हसेत्, पिबतु ।————————

उत्तर– गृहकार्य करें ।

परियोजना कार्य———

संचिका में अपने प्रिय खिलाडि.यों के चित्र बनाकर या चिपकाकर उनका परिचय निर्देशानुसार सारणीबद्ध रुप में दीजिए।

नाम——————————————

1. पितुः नाम——————————————
2. मातुः नाम——————————————
3. जन्मस्थानम्——————————————
4. जन्मतिथिः——————————————
5. कीडायाः नाम——————————————

6.पदकानि/पुरस्काराणि/सम्मानम्/उपलब्धिः————————————

# DAY-4

संधि विच्छेद करें।

क. सूर्य+अस्तः =

ख. रजनी+ईशः =

ग. गज+इन्द्रः =

घ. राजा+ऋषिः =

ङ सह+एव =

च. जल+ओघः =

छ. रवि+अपि =

ज. साधु+इति =

झ. गै+अकः =

ञ. चे+अनम् =

2. संधि करें।

क. मुनीशः –

ख. महाशयः –

ग. धनेशः –

घ. भाग्योदयः –

ङ. कृष्णैक्यम् –

च. प्रार्थनैषा –

छ. लाकृतिः –

ज. वध्वाज्ञा –

झ. भावुकः –

ञ. भवनम् –

# DAY-5

## अनुच्छेद – राष्ट्रीय एकता

राष्ट्रीय एकतायाः वर्तमानसमये महत्त्वम् अस्ति । मतभेदस्य विरोधस्य वा अभावः एकता कथ्यते । एकतायाः अपरं नाम " संघटनम् " अपि वर्तते । अधुना समाजे , देशे , संसारे च एकतायाः अभावः दृश्यते । एतस्य प्रधान कारणम् तु स्वार्थपरता एव अस्ति ।

( गंगा )

गंगा नदी भारते पवित्रा नदी अस्ति । गंगायाः अपरं नाम भागीरथी अस्ति । गंगायाः जलं स्वच्छम् शुद्धम् च भवति । गंगा हिमालयात् निःसरति । भारते गंगा मातासदृशा पूज्या अस्ति ।

( आदर्शः छात्रः )

यः छात्रः अनुशासनं पालयति सः आदर्शः छात्रः भवति । आदर्शः छात्रः शिष्टाचारं पालयति । गुरूजनस्य आज्ञाम् पालनं करोति । सर्वदा पठनकार्ये परिश्रमं करोति । आदर्शः छात्रः सर्वप्रियः भवति ।

( जन्तुशाला )

जन्तूनां शाला इति जन्तुशाला कथ्यते । जन्तुशालायाम् अनेके पशवः पक्षिणः च भवन्ति । जनाः इमान् पक्षिणः पशून् च द्रष्टुम् दूरतः आगच्छन्ति । जन्तुशालायाः सर्वाः व्यवस्थाः प्रशासनेन क्रियते । बालकाः जन्तुशालां गत्वा प्रसन्नाः भवन्ति ।

## ( भारतवर्षः )

अस्माकं देशः भारतवर्षः अस्ति । अयं विशालः देशः अस्ति । भारतः उत्सवानां देशः अस्ति । अस्य उत्तरस्याम् हिमालयः अस्ति । अयं विश्वगुरुरूपेण विख्यातः अस्ति ।

## ( अनुशासनम् )

अनु +शासनं अनुशासनम् भवति । अनुशासनेन विना जीवनं व्यर्थम् भवति । छात्राणाम् कृते अनुशासनं आवश्यकम् भवति । अनुशासनस्य प्रयोगं कृत्वा मानवाः स्वलक्ष्यं प्राप्नुवन्ति। सत्यं कथनम् इदं " अनुशासनम् छात्राणाम् आभूषणम् " ।

## ( विद्याधनम् )

विद्याधनम् धनेषु सर्वश्रेष्ठं धनं अस्ति । अस्याः अभावे मानवाः पशुतुल्याः भवन्ति । आपत्तिकाले विद्या परममित्रम् भवति । सर्वेषाम् धनानाम् क्षयम् भवति परन्तु विद्याधनं अक्षुण्णः भवति । सत्यं कथनं इदं – विद्या परम् आभूषणम् ।

## ( छात्रजीवनम् )

छात्रजीवनम् स्वर्णकालः भवति । अस्मिन् काले छात्राः स्वजीवनस्य निर्माणम् कुर्वन्ति । यः छात्रः जीवने ध्यानेन पठनं करोति सः सफलः भवति । वस्तुतः अस्मिन् समये मानवाः अनेकाः उपलब्धिः प्राप्नुवन्ति । सत्यं कथनं इदं – छात्रजीवनं साधनाकालम् भवति ।

## ( वसन्तऋतुः )

भारतः ऋतुणाम् देशः अस्ति । ऋतुषु वसन्तऋतुः अन्यतमः अस्ति । अस्मिन् काले मन्दः पवनः प्रवहति । सर्वत्र सुन्दराणि पुष्पाणि विकसन्ति । वसन्तकाले प्रकृतिः मनोरमम् प्रतीयते ।

## ( पुस्तकालयः )

पुस्तकानाम् आलयः पुस्तकालयः कथ्यते । पुस्तकालये अनेकानि पुस्तकानि भवन्ति । छात्राः तूष्णीम् भूत्वा अध्ययनं कुर्वन्ति । तत्र कथा , नाटक , उपन्यासः , कविता , संवादादि , पत्र – पत्रिकाः भवन्ति । सर्वे पुस्तकानाम् अध्ययनमृ कृत्वा आनंदं प्राप्नुवन्ति ।

## ( फलम् )

| विभक्ति | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्याम् | फलैः |
| चतुर्थी | फलाय | फलाभ्याम् | फलेभ्यः |
| पंचमी | फलात् | फलाभ्याम् | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| संबोधन | हे फल! | हे फले ! | हे फलानि! |